संस्कृत-वार्ता:
25.09.2024
सायम् - 06:20

मुख्यवार्ता:

- जम्मू-कश्मीरे अद्य द्वितीयचरणस्य विधानसभानिर्वाचने पञ्चवादनपर्यन्तं चतुःपञ्चाशत्- प्रतिशतं मतदानं जातम्।
- हरियाणाविधानसभानिर्वाचनाय प्रचाराभियानम् सजवं प्रवर्तते। प्रधानमन्त्री तथा भाजपा दलस्य वरिष्ठ: नेता नरेन्द्रमोदी अद्य सोनीपतस्य गोहानायां जनाशीर्वाद-सभां सम्बोधितवान्।
- प्रधानमन्त्री नरेन्द्रमोदी दश-वर्षाणां मेक इन इण्डिया इत्यस्य उपक्रमस्य सम्पन्नतायाः प्रशंसां कृतवान्।
- उपराष्ट्रपति जगदीप धनखड़: अद्य उत्तरप्रदेशस्य ग्रेटर नोएडायां उत्तरप्रदेश अन्ताराष्ट्रियव्यापारप्रदर्शिन्याः द्वितीयसंस्करणस्य उद्घाटनं कृतवान्।
- भारतीय-ऋतु-विज्ञानविभागेन आगामि-शनिवासरपर्यन्तं कोंकणक्षेत्रेषु, गोवायाम्, मध्यमहाराष्ट्रे, गुजराते, मध्यप्रदेशे च अतोऽपि अतिवृष्टि-सञ्चेतना प्रख्यापितास्ति।
- बैडमिण्टन् क्रीडायां भारतस्य किदाम्बी-श्रीकान्तः इजरायल्देशस्य डेनियल्-डुबोवेन्को इत्यमुं पुरुष-एकल-क्रीडायां पराजितवान् ।

जम्मू-कश्मीरः

जम्मू-कश्मीरे अद्य द्वितीयचरणस्य विधानसभानिर्वाचने त्रिवादनपर्यन्तं पञ्चवादनपर्यन्तं चतुःपञ्चाशत्- प्रतिशतं मतदानं जातम्। उत्साहि-मतदातॄणां दीर्घाः पङ्क्तयः स्वस्य मताधिकारस्य प्रयोगाय सिद्धाः दृष्टाः। केन्द्रशासितप्रदेशस्य षट्मण्डलेषु षड्विंशतिः विधानसभाखण्डेषु सर्वेषु द्वि-अधिक-पञ्चशतोत्तर-त्रिसहस्रं मतदानकेन्द्रेषु कठिन-सुरक्षा-व्यवस्थानां मध्ये मतदानं प्रातः सप्तवादने आरब्धम्। अस्मिन् चरणे, एकोन-चत्वारिंशदुत्तर-द्विशतम् अभ्यर्थीनां भाग्यस्य निर्णयं प्रायः पादोन-षड्विंशति-लक्षं मतदातारः करिष्यन्ति।

## प्रधानमन्त्री-हरियाणा-निर्वाचनम्

हरियाणाविधानसभानिर्वाचनाय प्रचाराभियानम् सजवं प्रवर्तते। प्रधानमन्त्री तथा भाजपा दलस्य वरिष्ठ: नेता नरेन्द्रमोदी अद्य सोनीपतस्य गोहानायां द्वाविंशतिः विधानसभा-क्षेत्राणां दलस्य अभ्यर्थिनः पक्षे जनाशीर्वाद-सभां सम्बोधितवान् । अस्मिन् अवसरे श्रीमोदी एनडीए-सर्वकारेण समारब्धस्य मेक इन इण्डिया-उपक्रमस्य लाभान् प्रकाशितवान् ।

प्रधानमन्त्री अवदत् यत् हरियाणा-भाजपासर्वकारस्य कार्यकाले उद्योग-कृषि इत्यादिषु क्षेत्रेषु हरियाणा राज्येण शीर्षराज्येषु स्वस्थानं संरक्षितम् अस्ति। सः अवदत् यत् राज्ये भाजपायाः समर्थनं प्रतिदिनं वर्धमानम् अस्ति। कुरुक्षेत्रे भाजपायाः वरिष्ठ: नेता तथा केन्द्रीयमन्त्री नितिन गडकरी जनसभाम् सम्बोधितवान्। भारतीय राष्ट्रीय लोकदलेन अद्य पूर्व उपप्रधानमंत्री चौधरी देवीलाल वर्यस्य जयंत्यवसरे जिन्द मण्डलस्य जुलानायां जननायक सम्मान इति पथ प्रदर्शन्याः आयोजनं कृतम्। बहुजन समाज पार्टीति दलस्य प्रमुखा मायावती, शिरोमणि अकाली दलस्य च प्रमुखः सुखबीर बादलः अपि आई.एन.एल.डी नेतृभिः सह सभां सम्बोधयिष्यन्ति। आम आदमी पार्टीति दलस्य राष्ट्रिय संयोजकः अरविन्द केजरीवालः अपि अद्य मेहम् इत्यत्र जनसभां सम्बोधयिष्यति। नवति सदस्यानां हरियाणाविधानसभायाः मतदानं अक्टोबर् पञ्चमे दिनाङ्के भविष्यति, मतदानस्य गणना अक्टोबर् अष्टमे दिनाङ्के भविष्यति।

## प्रधानमन्त्री नरेन्द्रमोदी - मेक इन इण्डिया

प्रधानमन्त्री नरेन्द्रमोदी दश-वर्षाणां मेक इन इण्डिया इत्यस्य उपक्रमस्य सम्पन्नतायाः प्रशंसां कृतवान्। सामाजिक-संजालीय-सन्देशे श्रीमोदी-महोदयेन बोधितं यत् 'मेक इन इण्डिया' इति राष्ट्रं विनिर्माण-नवाचार-शक्तिकेन्द्रे परिणमयितुं समस्त-भारतीयानां सामूहिक-संकल्पं दर्शयति। सर्वकारस्य प्रतिबद्धतां सः उक्तवान् यत् तस्य सर्वकारः सर्वैः सम्भवैः उपायैः 'मेक इन इण्डिया' इत्यस्य प्रोत्साहनं करोति।

उपराष्ट्रपति जगदीप धनखड़:

उपराष्ट्रपतिः जगदीप धनखड़: अद्य उत्तरप्रदेशस्य ग्रेटर नोएडायां उत्तरप्रदेश अन्ताराष्ट्रियव्यापारप्रदर्शन्याः द्वितीयसंस्करणस्य उद्घाटनं कृतवान्। उद्घाटनसत्रं सम्बोधयन् श्रीधनखड़महोदयः उत्तरप्रदेशे सूक्ष्म-लघु-मध्यम-उद्यम-क्षेत्रस्य विकासस्य प्रशंसाम् अकरोत्।

कार्यक्रमस्य उद्घाटनसमारोहे केन्द्रीयसूक्ष्म-लघु-मध्यम-उद्यममन्त्री जीतनराममांझी, उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः चापि उपस्थितौ आस्ताम्। मन्त्री जीतनराम मंझी स्वसम्बोधने देशे सूक्ष्म-लघु-मध्यम-उद्यम क्षेत्रस्य कृते क्रियमाणानां कार्याणां विषये उक्तवान्। उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः अवदत् यत् राज्यस्य प्रायः षण्णवतिः लक्षं यावत् सूक्ष्म-लघु-मध्यम-उद्यमाः देशस्य आर्थिकवृद्धौ महत्त्वपूर्णं योगदानं ददति। सः अवदत् यत्, उत्तरप्रदेशः देशस्य विकासस्य, विकास अभियन्त्रम् अस्ति।

पंडित दीनदयाल उपाध्याय-जन्मजयन्ती

प्रधानमंत्री नरेन्द्र मोदी, गृहमंत्री अमित शाहः एवं रक्षामंत्री राजनाथ सिंहः च अद्य पंडित दीनदयाल उपाध्याय वर्यस्य जयन्त्यवसरे श्रद्धा-कुसुमान् समर्पितवन्तः। सामाजिक-संजालीय-सन्देशे प्रधानमन्त्रिणा कथितं यत् महान् राष्ट्रवादीचिन्तकेन प्रवर्तितायाः अन्त्योदयस्य अवधारणा विकसितस्य भारतस्य संकल्पं प्राप्तुं अमूल्यं भूमिकां निर्वहति।

भारतम् – शक्तिशील-राष्ट्रम्

एशिया-शक्तिसूचकाङ्के जापानदेशं अतिक्रम्य भारतं तृतीयं शक्तिशाली राष्ट्रम् अभवत्। ऐषमे एशिया-शक्ति-सूचकाङ्क-प्रतिवेदने सूचितं यत् कोविड्-उत्तरस्य प्रबल-आर्थिक-वृद्ध्या भारतस्य आर्थिक-क्षमता चत्वारि-दशमलव-द्वे बिन्दुभिः वर्धिता अस्ति। प्रतिवेदने इदमपि प्रकाशितं यत् भारतेन अन्येषु सर्वेषु संसाधनमापेषु विशेषतः भविष्य-संसाधनेषु उत्तमं प्रदर्शनं कृतम्, यत्र तस्य परिणामः अष्टौ-दशमलव-द्वे इति अंकैः वर्धितः।

केन्द्रीयवाणिज्य-उद्योगमन्त्री पीयूषगोयलः

केन्द्रीयवाणिज्य-उद्योगमन्त्री पीयूषगोयलः उक्तवान् यत् भारतं आस्ट्रेलिया च व्यापक-आर्थिक-सहकार-सन्धि-माध्यमेन आर्थिक-सहकार-व्यापार-सहयोगस्य सुदृढीकरणाय कार्यं कुर्वतः। गोयलः उक्तवान् यत् अनेन उभयपक्षेषु विपणीप्रवेशः सुलभायितः तथा च द्वयोः राष्ट्रयोः मध्ये व्यापारे महती वृद्धिः अभवत्। अद्य एडिलेड्-नगरे संयुक्त-पत्रकारसम्मेलनं सम्बोधयन् गोयल्-महोदयः आस्ट्रेलिया-देशस्य सिड्नी-नगरे व्यापार-प्रवर्धनार्थं कार्यालयस्य

स्थापनायाः घोषणां कृतवान्। कार्यालये इन्वेस्ट् इण्डिया, नेशनल् इंडस्ट्रियल कॉरिडोर डेवलपमेंट कार्पोरेशन लिमिटेड, एक्सपोर्ट् क्रेडिट् गारण्टी कार्पोरेशन आफ् इण्डिया लिमिटेड इत्यादीनां संस्थानां प्रतिनिधयः भविष्यन्ति। सः अवदत् यत् एते कार्यालयाः निवेशकानां व्यापारिणां च मध्ये सेतुरूपेण कार्यं करिष्यन्ति। गोयलमहोदयेन मेक इन इण्डिया इत्यस्य कार्यक्रमस्य सफलतायाः विषये अपि प्रकाशितम् । सः अवदत् यत् एषः कार्यक्रमः अद्वितीय-सफलतां प्राप्नोत्, यत् स्टार्ट-अप इत्यमुं प्रोत्साहयति, भारते विनिर्माणस्य प्रवर्धनं च करोति।

ऋतुविज्ञानविभागः

भारतीय-ऋतु-विज्ञानविभागेन आगामि-शनिवासरपर्यन्तं कोंकणक्षेत्रेषु, गोवायाम्, मध्यमहाराष्ट्रे, गुजराते, मध्यप्रदेशे च अतोऽपि अतिवृष्टि-सञ्चेतना प्रख्यापितास्ति। अपि च अद्य समुद्री-तटीय-प्रदेशेषु, मध्य-कर्णाटके, विदर्भायां च अतिवृष्टिपरा सञ्चेतना अनुमानिता। अनेन विभागेन असमे, मेघालये, अरुणाचलप्रदेशे, पश्चिम-बंगे,सिक्किमे च श्वः यावत् महती वृष्टिः प्रकल्पिता ।

बैडमिण्टन् क्रीडा

बैडमिण्टन् क्रीडायां भारतस्य किदाम्बी-श्रीकान्तः इजरायल्देशस्य डेनियल्-डुबोवेन्को इत्यमुं मकाऊ-ओपन्-इति पुरुष-एकल-क्रीडायां पराजितवान् ।

।। इति वार्ताः।।